# shrIlalitAaShTottarashatanAmadivyastotram

# શ્રીલલિતાઽષ્ટોત્તરશતનામદિવ્યસ્તોત્રમ્

## Document Information

Text title : lalitA.aShTottarashatanAmadivyastotram

File name : lalitaa108.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, lalitA, stotra, devI

Location : doc_devii

Translated by : N.Balasubramanian bbalu@satyam.net.in

Latest update : December 10, 2003, November 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 20, 2022

*sanskritdocuments.org*

# શ્રીલલિતાઽષ્ટોત્તરશતનામદિવ્યસ્તોત્રમ્

॥ શ્રીઃ ॥

॥ અથ શ્રીલલિતાઽષ્ટોત્તરશતનામદિવ્યસ્તોત્રમ્ ॥

શિવપ્રિયાશિવારાધ્યા શિવેષ્ટા શિવકોમલા ।
શિવોત્સવા શિવરસા શિવદિવ્યશિખામણિઃ ॥ ૧॥

શિવપૂર્ણા શિવઘના શિવસ્થા શિવવલ્લભા ।
શિવાભિન્ના શિવાર્ધાઙ્ગી શિવાધીના શિવંકરી ॥ ૨॥

શિવનામજપાસક્તા શિવસાંનિધ્યકારિણી ।
શિવશક્તિઃ શિવાધ્યક્ષા શિવકામેશ્વરી શિવા ॥ ૩॥

શિવયોગીશ્વરીદેવી શિવાજ્ઞાવશવર્તિની ।
શિવવિદ્યાતિનિપુણા શિવપઞ્ચાક્ષરપ્રિયા ॥ ૪॥

શિવસૌભાગ્યસમ્પન્ના શિવકૈઙ્કર્યકારિણી ।
શિવાઙ્કસ્થા શિવાસક્તા શિવકૈવલ્યદાયિની ॥ ૫॥

શિવક્રીડા શિવનિધિઃ શિવાશ્રયસમન્વિતા ।
શિવલીલા શિવકલા શિવકાન્તા શિવપ્રદા ॥ ૬॥

શિવશ્રીલલિતાદેવી શિવસ્ય નયનામૃતા ।
શિવચિન્તામણિપદા શિવસ્ય હૃદયોજ્જ્વલા ॥ ૭॥

શિવોત્તમા શિવાકારા શિવકામપ્રપૂરિણી ।
શિવલિઙ્ગાર્ચનપરા શિવાલિઙ્ગનકૌતુકી ॥ ૮॥

શિવાલોકનસંતુષ્ટા શિવલોકનિવાસિની ।
શિવકૈલાસનગરસ્વામિની શિવરઞ્જિની ॥ ૯॥

શિવસ્યાહોપુરુષિકા શિવસંકલ્પપૂરકા ।
શિવસૌન્દર્યસર્વાઙ્ગી શિવસૌભાગ્યદાયિની ॥ ૧૦॥

શિવશબ્દૈકનિરતા શિવધ્યાનપરાયણા ।
શિવભક્તૈકસુલભા શિવભક્તજનપ્રિયા ॥ ૧૧॥

શિવાનુગ્રહસમ્પૂર્ણા શિવાનન્દરસાર્ણવા ।
શિવપ્રકાશસંતુષ્ટા શિવશૈલકુમારિકા ॥ ૧૨॥

શિવાસ્યપઙ્કજાર્કાભા શિવાન્તઃપુરવાસિની ।
શિવજીવાતુકલિકા શિવપુણ્યપરંપરા ॥ ૧૩॥

શિવાક્ષમાલાસંતૃપ્તા શિવનિત્યમનોહરા ।
શિવભક્તશિવજ્ઞાનપ્રદા શિવવિલાસિની ॥ ૧૪॥

શિવસંમોહનકરી શિવસાંરાજ્યશાલિની ।
શિવસાક્ષાદ્બ્રહ્મવિદ્યા શિવતાણ્ડવસાક્ષિણી ॥ ૧૫॥

શિવાગમાર્થતત્ત્વજ્ઞા શિવમાન્યા શિવાત્મિકા ।
શિવકાર્યૈકચતુરા શિવશાસ્ત્રપ્રવર્તકા ॥ ૧૬॥

શિવપ્રસાદજનની શિવસ્ય હિતકારિણી ।
શિવોજ્જ્વલા શિવજ્યોતિઃ શિવભોગસુખંકરી ॥ ૧૭॥

શિવસ્ય નિત્યતરુણી શિવકલ્પકવલ્લરી ।
શિવબિલ્વાર્ચનકરી શિવભક્તાર્તિભઞ્જની ॥ ૧૮॥

શિવાક્ષિકુમુદજ્યોત્સ્ના શિવશ્રીકરુણાકરા ।
શિવાનન્દસુધાપૂર્ણા શિવભાગ્યાબ્ધિચન્દ્રિકા ॥ ૧૯॥

શિવશક્ત્યૈક્યલલિતા શિવક્રીડારસોજ્જ્વલા ।
શિવપ્રેમમહારત્નકાઠિન્યકલશસ્તની ॥ ૨૦॥

શિવલાલિતળાક્ષાર્દ્રચરણાંબુજકોમલા ।
શિવચિત્તૈકહરણવ્યાલોલઘનવેણિકા ॥ ૨૧॥

શિવાભીષ્ટપ્રદાનશ્રીકલ્પવલ્લીકરાંબુજા ।
શિવેતરમહાતાપનિર્મૂલામૃતવર્ષિણી ॥ ૨૨॥

શિવયોગીન્દ્રદુર્વાસમહિમ્નસ્તુતિતોષિતા ।
શિવસમ્પૂર્ણવિમલજ્ઞાનદુગ્ધાબ્ધિશાયિની ॥ ૨૩॥

શિવભક્તાગ્રગણ્યેશવિષ્ણુબ્રહ્મેન્દ્રવન્દિતા ।

શિવમાયાસમાક્રાન્તમહિષાસુરમર્દિની ।
શિવદત્તબલોન્મત્તશુમ્ભાદ્યસુરનાશિની ॥ ૨૪॥

શિવદ્વિજાર્ભકસ્તન્યજ્ઞાનક્ષીરપ્રદાયિની ।
શિવાતિપ્રિયભક્તાદિનન્દિભૃઙ્ગિરિટિસ્તુતા ॥ ૨૫॥

શિવાનલસમુદ્ભૂતભસ્મોદ્ધૂલિતવિગ્રહા ।
શિવજ્ઞાનાબ્ધિપારજ્ઞમહાત્રિપુરસુન્દરી ॥ ૨૬॥

ઇત્યેતલ્લલિતાનામ્નામષ્ટોત્તરશતં મુને ।
અનેકજન્મપાપઘ્નં લલિતાપ્રીતિદાયકમ્ ॥ ૨૭॥

સર્વૈશ્વર્યપ્રદં નૃણામાધિવ્યાધિનિવારણમ્ ।
યો મર્ત્યઃ પઠતે નિત્યં સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૮॥

ઇતિશ્રીલલિતોપાખ્યાને સ્તોત્રખણ્ડે શ્રીલલિતાષ્ટોત્તર-
શતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by N. Balasubramanian bbalu@satyam.net.in

---

*shrIlalitAaShTottarashatanAmadivyastotram*

pdf was typeset on November 20, 2022

Please send corrections to *sanskrit@cheerful.com*